दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-166

1

अप्रैल 08, 2026

Website- www.himsanskritam.com

Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखकृष्णषष्ठी
चैत्र 25 प्रविष्ठांशः मङ्गलमयः भवेत्


2 अस्मिन् वर्षे एकलक्ष-कृषकाः प्राकृतिककृषिणा सह योजयिष्यन्ते - मुख्यमंत्री सुक्खुः

3 परिवर्तनाय असमः सज्जः, कांग्रेस-सर्वकारः भविष्यति—मुख्यमंत्रीः सुखविन्द्रसिंहसुक्खू

4 अमरीकी-राष्ट्रपति-डोनाल्ड-ट्रम्पस्य ईरान-देशं प्रति भर्त्सना; होर्मुज-जलसन्धिं न उद्घाटयति चेत् विद्युत्-संयन्त्राणां सेतूनां च विनाशस्य संचेतना


## असम-केरल-केन्द्रशासित-पुदुचेरी-प्रदेशेषु विधानसभा निर्वाचनस्य प्रचारः समाप्तः

असम-केरल-केन्द्रशासित-पुदुचेरी-प्रदेशेषु विधानसभा निर्वाचनस्य प्रचारः समाप्तः। गतदिवसे अन्तिमहोरासु विभिन्नानां राजनैतिकदलानां प्रमुखाः नेतारः मतदातृभिः सह सम्पर्कं स्थापयितुं, एतेषु प्रदेशेषु स्वसमर्थनस्य आधारं सुदृढं कर्तुं समन्वितप्रयासान् कृतवन्तः ।

## पश्चिमबङ्गालराज्ये विशेष-गहन पुनरीक्षणस्य माध्यमेन पुष्टिः अभवत् यत्, प्रायः सप्तविंशति लक्षाधिकाः जनाः अयोग्याः सन्ति

निर्वाचनायोगेन मतदातृ-सूची विशेष-गहन-पुनरीक्षणस्य अन्तर्गतं न्यायिक-समीक्षायाः अन्तर्गतं च मतदातृणां पूर्ण-सूचिः प्रकाशिता, यस्मिन् पश्चिमबङ्गालराज्ये द्वात्रिंशत् लक्षाधिकाः मतदातारः योग्याः सन्ति तत्रैव प्रायः सप्तविंशति लक्षाधिकाः जनाः अयोग्याः सन्ति। प्रथमवारं मण्डलवारविवरणानि सार्वजनिकरूपेण प्रसारितानि, यत्र मतदातारः योग्याः अयोग्याः वा इति स्पष्टतया वर्गीकृताः सन्ति। प्रतिवेदनस्य अनुसारं, षष्ठी लक्षाधिकानि नामानि अधुनापि परीक्षणे आसन्।

## श्रीगुरुतेगबहादुरवर्यस्य जन्मदिवसम् अमृतसरस्य गुरोः जन्मस्थाने गुरुद्वारा गुरु-का-महल इत्यत्र श्रद्धया भक्त्या च आचरितः



सिक्खमता-वलम्बिनां नवमः गुरो श्रीगुरुतेगबहादुर् वर्यस्य जन्मदिवसम् अमृतसरस्य गुरोः जन्मस्थाने गुरुद्वारा गुरु का महल इत्यत्र श्रद्धया भक्त्या च आचरितः। गुरुद्वारस्य गुरु-का-महल् इत्यस्य कृते श्रीहरमन्दिर-साहिब अकाल्-तख्त इत्यतः धार्मिकयात्रा आरब्धा। उपराष्ट्रपतिः डॉ. सी.पी. राधाकृष्णन् वर्यः, प्रधानमन्त्री नरेन्द्रमोदी, गृहमन्त्री श्री. अमितशाहः, पञ्जाब-राज्यस्य मुख्यमन्त्री भगवन्त-मानः च अस्मिन् अवसरे गुरु-तेग बहादुर-वर्याय श्रद्धाञ्जलिम् अर्पितवन्तः।

# पेट्रोल, डीज़ल्, एल्.पी.जी., पी.एन्.जी. इत्येतेषाम् आपूर्तिः सम्पूर्णे देशे सामान्यः एव अस्ति- केन्द्रसर्वकारः



पेट्रोल, डीज़ल्, एल्.पी.जी., पी.एन्.जी. इत्येतेषाम् आपूर्तिः सम्पूर्णे देशे सामान्यः एव अस्ति इति प्रशासनेन उक्तम्। नवदेहल्यां पश्चिमएशियायाः वर्तमान स्थित्याः विषये अन्तामन्त्रालयीयं विवरणं सम्बोधयन्ती पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्तसचिवा सुजाता शर्मा इत्येषा अवदत् यत्, कस्मिन् अपि एल्.पी.जी.-वितरणसमवाये शुष्कतायाः सूचना न प्राप्ता। सा उक्तवती यत् सर्वाणि पेट्रोल पम्प्स् क्षेत्राणि सामान्यरूपेण प्रचलन्ति यत्र पेट्रोल-डीज़ल् पर्याप्त मात्रायाम् उपलभ्यन्ते, तथा च अभावस्य सूचना नास्ति। श्रीमती शर्मा अवदत् यत् एल्.पी.जी. सिलिण्डर् इत्यस्य वितरणम् अपि सुगमतया प्रचलति तथा च आनलाईन एल्.पी.जी. आरक्षण-प्रक्रिया प्रायः षण्णवति प्रतिशतं यावत् वर्धिताऽस्ति ।

## उपराष्ट्रपतिः नवदेहल्याम् आयोजितस्य इग्नू-संस्थायाः एकोनचत्वारिंशत्तमं दीक्षान्तसमारोहं सम्बोधितवान्



उपराष्ट्रपतिः सी.पी. राधाकृष्णनवर्यः अवदत् यत् राष्ट्रस्य वास्तविक शक्तिः तस्य जनानां ज्ञानेषु, मूल्येषु, क्षमतासु च निहितास्ति। सः अवदत् यत् इग्नू इत्यादयः संस्थाः व्यावसायिक प्रमाणपत्रं कौशल-प्रशिक्षणं च प्रदातुं स्वस्य प्रादेशिक-केन्द्रमाध्यमेन राष्ट्रियकौशलव्यवस्थायाः निर्माणे प्रमुखां भूमिकां निर्वहन्ति। उप-राष्ट्रपतिः अग्रे अवदत् यत् एतादृशाः प्रयत्नाः सप्तचत्वारिंशदधिक द्विसहस्रतमवर्षं पर्यन्तं विकसितभारतस्य लक्ष्यं साधयितुं साहाय्यं करिष्यन्ति। नवदेहल्याम् आयोजितस्य इग्नू-संस्थायाः एकोनचत्वारिंशत्तमं दीक्षान्तसमारोहं सम्बोधयन् श्री राधाकृष्णन् वर्यः अवदत् यत् (इग्नू) इति इन्दिरा-गान्धी-राष्ट्रिय-मुक्त-विश्वविद्यालयः सुलभशिक्षायाः माध्यमेन सम्पूर्ण राष्ट्रं संयोजयित्वा, शिक्षण-परिदृश्यं परिवर्तयित्वा च देशस्य गौरवम् अवाप्नोत्।

## राज्येषु प्रवासीश्रमिकाणां कृते एल्.पी.जी. वातीन्धनस्य दैनिक-वितरणं द्विगुणी कर्तुं निर्णयः स्वीकृतः

पेट्रोलियम एवं प्राकृतिक गैस मंत्रालय
MINISTRY OF PETROLEUM AND NATURAL GAS

प्रशासनेन राज्येषु प्रवासीश्रमिकाणां कृते वितरणाय उपलभ्यमानानां पञ्च किलोग्राम् मुक्तव्यापारस्य एल्. पी. जी. वातीन्धनस्य दैनिक-वितरणं द्विगुणी कर्तुं निर्णयः कृतः। पेट्रोलियम तथा प्राकृतिकगैस मन्त्रालयस्य सचिवः डॉ. नीरज मित्तलः अस्मिन् विषये सर्वेषां राज्यानां केन्द्रशासितप्रदेशानां च मुख्यसचिवान् उद्दिश्य पत्रम् अलिखत्। सः अवदत् यत्, एतानि पञ्च किलोग्राम् युतानि एल्. पी. जी. वातीन्धन-कुपिकानि राज्यसर्वकारेषु, तेषां खाद्य-नागरिक-आपूर्ति-विभागेषु च केवलं स्वराज्ये प्रवासीश्रमिकानां आपूर्त्यै एव तैलविपणन-संस्थानां साहाय्येन प्रदीयन्ते।

## खाद्यसुरक्षायाः सुनिश्चितता, कृषकाणां आयवृद्धिः च सर्वकारस्य सर्वोच्चप्राथमिकताः - शिवराजसिंह चौहानः



कृषि-कृषक-कल्याण-मन्त्रिणा शिवराजसिंह चौहानेन उक्तं यत् खाद्यसुरक्षायाः सुनिश्चितता, कृषकाणां आयवृद्धिः च सर्वकारस्य सर्वोच्चप्राथमिकताः सन्ति। केन्द्रीयमन्त्री गतदिवसे जयपुरनगरे आयोजितां क्षेत्रीयकृषि-सम्मेलनम् अभिसंबोधयन् आसीत्। सः अवदत् यत् कृषिक्षेत्रे सुदृढीकरणाय दृढः बहुआयामी च प्रयत्नाः कृताः सन्ति।

## सुभाषितम्

**उच्छिद्यते धर्मवृतम्,**
**अधर्मो विद्यते महान्।**
**भयमाहुर्दिवारात्रं,**
**यदा पापो न वार्यते।।**

भावार्थः- समाज में जब पापकर्मों के ऊपर कोई नियन्त्रण और प्रतिबन्ध नहीं होता है तो लोगों के धार्मिक आचरण में न्यूनता होने लगती है और अधर्म में वृद्धि होने से रात दिन सर्वत्र भय व्याप्त हो जाता है।


हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## बाङ्गलादेशस्य विदेशमन्त्री खलीलुर रहमानः त्रिदिवसीय-भारतयात्रायाम् नवदेहलीं सम्प्राप्तः

बाङ्गलादेशस्य विदेशमन्त्री खलीलुर रहमानः त्रिदिवसीय-भारतयात्रायाम् गतसायं नवदेहलीं प्राप्तवान्। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जयसवालः श्रीरहमानस्य स्वागतं कृतवान्। सः अवदत् यत् द्वयोः देशयोः मध्ये ऐतिहासिकाः सौहार्दपूर्णाः च सुदृढाः सम्बन्धाः सन्ति। सः उक्तवान् यत् एषा यात्रा भारत-बाङ्गलादेश-सहयोगं अधिकं सुदृढं करिष्यति। श्रीरहमानः विदेशमन्त्रिणा सुब्रह्मण्यम् जयशङ्करेण सह चर्चां करिष्यति। तस्य राष्ट्रिय-सुरक्षा-सल्लाहेन (NSA) अजीतडोभालेन तथा पेट्रोलियम-प्राकृतिकवायु-मन्त्रिणा हरदीपसिंहपुरी महोदयेन सह अपि मिलनस्य सम्भावना वर्तते। फरवरी-मासे नवीनसर्वकारस्य सत्तागमनानन्तरं कस्यपि बाङ्गलादेशी-मन्त्रिणः एषा प्रथमा भारतयात्रा अस्ति।

# अस्मिन् वर्षे एकलक्ष-कृषकाः प्राकृतिककृषिणा सह योजयिष्यन्ते - मुख्यमंत्री सुक्खुः




**हिमसंस्कृतवार्ताः -शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खू महोदयः मङ्गलवासरे उक्तवान् यत् कृषिविभागेन वर्षे २०२६ मध्ये एकलक्षं (१,००,०००) कृषकान् प्राकृतिककृषिणा सह योजयितुं लक्ष्यं निर्धारितम्। सः अवदत् यत् राज्यसर्वकारः प्राकृतिककृषिं सक्रियतया प्रोत्साहयति, कृषकान् च इमां पद्धतिं स्वीकर्तुं निरन्तरं प्रेरयति, यतः अनया पद्धत्या न्यूनव्ययेन अधिकः लाभः प्राप्यते। सः अकथयत् यत् अधुना यावत् २,२२,८९३ कृषक-उद्यानकृषकपरिवाराः प्राकृतिककृषिं स्वीकृतवन्तः। इयं पद्धतिः राज्यस्य ९९.३ प्रतिशतं पञ्चायतान् यावत् व्याप्ता अस्ति, वर्तमाने च ३८,४३७ हेक्टेयर-परिमितभूमौ अनया विधिना कृषिः क्रियते। मुख्यमन्त्रिणा उक्तं यत् प्राकृतिककृषिणा सम्बद्धानां लक्षद्वयाधिककृषकाणां पञ्जीकरणं कृतम्, येषु १,९८,००० कृषकेभ्यः प्रमाणपत्राणि अपि निर्गतानि।तेन सूचितं यत् 'प्राकृतिककृषिः खुशहालकिसानयोजना' इत्यस्याः अन्तर्गतं रासायनिक-आदानानां (Chemical Inputs) प्रयोगः हतोत्साहितः क्रियते, यदा तु देशीयगवां गोमयस्य, गोमूत्रस्य तथा स्थानीयानां वनस्पतीनां आधारेण संसाधनानि प्रवर्त्यन्ते। अस्याः योजनायाः मुख्योद्देश्येषु पर्यावरणसंरक्षणं, सस्यविविधीकरणस्य प्रोत्साहनं तथा कृषिव्ययस्य न्यूनीकरणं सम्मिलितम् अस्ति। सुक्खू-महोदयः अवदत् यत् राज्यसर्वकारः कृषकेभ्यः उचितं मूल्यं सुनिश्चितं कर्तुं प्राकृतिकरूपेण उत्पादितेभ्यः सस्येभ्यः देशे सर्वाधिकं न्यूनतम-समर्थन-मूल्यं (MSP) प्रददाति। अस्मिन् वर्षे प्राकृतिकगोधूमस्य न्यूनतमसमर्थनमूल्यं ६० रूप्यकेभ्यः वर्धयित्वा ८० रूप्यकाणि प्रतिप्रतिसहस्रग्रामं (kg), मक्का ४० तः ५० रूप्यकाणि, पाङ्गीघाटीप्रदेशस्य यवस्य ६० तः ८० रूप्यकाणि तथा प्राकृतिकहरिद्रायाः न्यूनतमसमर्थनमूल्यं ९० तः वर्धयित्वा १५० रूप्यकाणि प्रतिप्रतिसहस्रग्रामं कृतम्।
तेन उक्तं यत् पाङ्गी-उपमण्डलं राज्यस्य प्रथमं पूर्णतः 'प्राकृतिककृषि-उपमण्डलम्' इति घोषितम्। सहैव आर्द्रकम् (अदरक) अपि प्रथमवारं न्यूनतमसमर्थनमूल्यस्य परिधौ आनीतं, यस्य मूल्यं ३० रूप्यकाणि प्रतिप्रतिसहस्रग्रामं निर्धारितम्। एतदतिरिक्तं गोदुग्धस्य क्रयणमूल्यं ६१ रूप्यकाणि प्रतिलीटरं तथा महिषीदुग्धस्य ७१ रूप्यकाणि प्रतिलीटरं निश्चितम्। मुख्यमन्त्री अवदत् यत् कृषिः राज्यस्य अर्थव्यवस्थायाः आधारस्तम्भः अस्ति, यतः प्रायः ९० प्रतिशतं जनसंख्या ग्रामीणक्षेत्रेषु निवसति तथा ५३.९५ प्रतिशतं जनाः साक्षात् जीविकायै कृषौ आश्रिताः सन्ति। एतत् क्षेत्रं राज्यस्य सकलघरेलू-उत्पादे (GDP) प्रायः १४.७० प्रतिशतं योगदानं ददाति। सः उक्तवान् यत् एतान् तथ्यान् ध्यानं दत्त्वा राज्यसर्वकारः ग्रामीण-अर्थव्यवस्थां सुदृढीकर्तुं प्रगतिशीलाः नीतीः कृषकहितैषिणः निर्णयान् च लागूकर्तुं प्रतिबद्धः अस्ति। कृषकेभ्यः लाभप्रदं मूल्यं सुनिश्चितं कर्तुं प्राकृतिकरूपेण उत्पादितस्य मक्का-गोधूमचूर्णस्य विपणनं (Marketing) 'हिम' (Him) इति नाम्ना (Brand) क्रियते।

# हिमाचले सीबीएसई-विद्यालयानां कृते ३९० पदेषु शिक्षकनियुक्तिप्रक्रिया प्रारब्धा, चतुर्णां विषयाणां कृते भविष्यति चयनम्



**हिमसंस्कृतवार्ताः - हमीरपुरम्।** हिमाचलप्रदेशराज्य-चयन-आयोगेन शिक्षाविभागान्तर्गतं 'सीबीएसई' (CBSE) सम्बद्धविद्यालयेषु शिक्षकाणां नियुक्त्यै विस्तृता अधिसूचना निर्गता। विभिन्नानां विषयाणां कुल ३९० पदानि पूरयिष्यन्ते। इच्छुकाः पात्रवर्गाः च अभ्यर्थिनः १३ अप्रैल २०२६ दिनाङ्कतः ४ मई २०२६ दिनाङ्कस्य रात्रि ११:५९ वादनपर्यन्तं आयोगस्य आधिकारिकजालपुटेन (Website) आवेदनं कर्तुं शक्नुवन्ति। आयोगानुसारं इयं नियुक्तिः चतुर्णां विषयाणां—जीवविज्ञान-रसायन-भौतिकी-वाणिज्य विषयाणां कृते क्रियते। एतेषु जीवविज्ञान-रसायन-भौतिकीविषयाणां कृते प्रत्येकं ७८-७८ पदानि निर्धारितानि, वाणिज्यविषयस्य कृते च १५६ पदानि रक्षितव्यानि। एवं प्रकारेण आहत्य ३९० पदानि निश्चितं कृतम्।

## त्रिंशत्सहस्रपरिमितं मानदेयं दास्यति सर्वकारः

एतेषु पदेषु चयनोपरान्तं अभ्यर्थिभ्यः प्रतिमासं ३०,००० (त्रिंशत्सहस्रं) रूप्यकाणां निश्चितं मानदेयं प्रदास्यते। एताः नियुक्तयः योजनाधारिताः (Scheme-based) भविष्यन्ति तथा च सेवासम्बद्धाः सर्वे नियमाः विभागद्वारा निर्धारितनियमानुसारं प्रवर्तन्ते।

## आरक्षणस्य प्रावधानम्

वर्गानुसारं पदेषु सामान्यवर्ग-आर्थिकदुर्बलवर्ग(EWS)-अनुसूचितजाति-अन्यपृष्ठवर्ग(OBC)-अनुसूचितजनजातिवर्गाणां कृते तथा बीपीएल(BPL)-स्वतन्त्रतासेनान्याश्रितश्रेणीनां कृते अपि आरक्षणस्य व्यवस्था कृता अस्ति। आयोगेन स्पष्टीकृतं यत् सर्वे आरक्षणनियमाः राज्यसर्वकारस्य नीत्यनुसारं प्रवर्तयिष्यन्ते।
आवेदनप्रक्रिया 'ऑनलाइन' (Online)
आवेदनप्रक्रिया पूर्णतः अन्तर्जालमाध्यमेन (Online) भविष्यति, केवलं आयोगस्य आधिकारिकजालपुटस्य माध्यमेन एव आवेदनानि स्वीकरिष्यन्ते। अन्येन केनापि माध्यमेन प्राप्तानि आवेदनपत्राणि न स्वीकृतानि भविष्यन्ति। अभ्यर्थिनः आवेदनात् पूर्वं पात्रता-निकषं, शैक्षणिकयोग्यतां, आयुसीमां, आवेदनशुल्कं चयनप्रक्रियां च अधिकृत्य निर्देशान् ध्यानपूर्वकं पठन्तु इति सूचितम्।

## किं कथयति आयोगस्य सचिवः?

राज्यचयन&आयोगस्य (हमीरपुरस्य) सचिवः डॉ. विक्रममहाजनः उक्तवान् यत् चयनप्रक्रिया पारदर्शिन्या समयबद्धरीत्या च संपादयिष्यते। सः अभ्यर्थिनः प्रार्थितवान् यत् अन्तिमां तिथिं प्रतीक्षितुं विना समयपूर्वमेव आवेदनप्रक्रियां पूरयन्तु, येन अन्तिमे समये प्राविधिकसमस्याभ्यः (Technical issues) रक्षितुं शक्येत्।

# Chamba News - भरमौरे निर्माणाधीनसेतुः रावीनद्यां पतितः, विभागस्य लक्षशः रूप्यकाणां हानिः



**हिमसंस्कृतवार्ताः - चम्बा।** हिमाचलप्रदेशस्य चम्बा-जनपदस्य जनजातीय-उपमण्डले भरमौर-होली सियूर-मार्गं भूत्वा रावीनद्यां निर्माणाधीनः सेतुः मङ्गलवासरे सहसा ध्वस्तः सन् नद्यां पतितः। सौभाग्यवशात् अस्यां दुघटनायां कस्यापि जनहानिः अथवा प्राणहानिः न अभवत्, परन्तु लोकनिर्माणविभागस्य (PWD) लक्षशः रूप्यकाणां क्षतिः संजाता अस्ति।
प्राप्तसूच्यनुसारं, भरमौर-होली सियूर-मार्गं भूत्वा सेतुनिर्माणस्य कार्यं विगतदिनेभ्यः 'युद्धस्तरे' (तीव्रगत्या) प्रचलति स्म। मङ्गलवासरे प्रातःकाले यदा निर्माणकार्यं प्रचलति स्म, तदैव सेतोः एकस्मिन् कोणे भीषणं भूस्खलनं (Landslide) अभवत्। भूस्खलनेन सेतोः आधारस्तम्भः शिथिलः जातः, येन कारणेन विशालः लौहसेतुः त्रुटित्वा अधः रावीनद्यां पतितः।

**लोकनिर्माणविभागस्य हानिः**

लोकनिर्माणविभागस्य अधिकारिणः सूचितवन्तः यत् अस्यां दुघर्टनायां विभागस्य महती आर्थिकहानिः अभवत्। यतः सेतुनिर्माणं अन्तिमचरणे आसीत्, अतः सामग्रीणां यन्त्राणां च अत्यधिकी क्षतिः जाता। अधिकारिणः घटनास्थलं प्राप्य स्थितेः निरीक्षणं कुर्वन्तः सन्ति। सेतोः ध्वस्तेन सियूर-क्षेत्रस्य ग्रामिणानां कृते सम्पर्क-समस्या उत्पन्ना। प्रशासनं वैकल्पिक-व्यवस्थानां विषये विचारं करोति, येन जनानां आवागमने असुविधा न भवेत्। आरक्षकदलम् अपि घटनास्थले उपस्थितः अस्ति येन कोऽपि जनः नद्याः समीपं न गच्छेत्।

# सेवाविस्तारे पुनर्नियुक्तौ च प्रतिबन्धः, प्रशासनिकसचिवानां कृते निर्देशाः निर्गताः



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशसर्वकारेण सेवाविस्तार-पुनर्नियुक्ति-पुनःसेवासंग्रहणेषु च पूर्णतः प्रतिबन्धः आरोपितः। अस्मिन् विषये मङ्गलवासरे कार्मिकविभागेन सर्वेभ्यः प्रशासनिकसचिवेभ्यः निर्देशाः निर्गताः। सर्वकारेण अयं निर्णयः स्वीकृतः यत् अधुना आरभ्य कस्यापि अधिकारिणः कर्मचारिणः वा सेवाविस्तार-पुनर्नियुक्ति-पुनःसेवासंग्रहण-सम्बद्धः कोऽपि प्रस्तावः प्रशासनिकविभागैः न प्रस्तोतव्यः।अस्मिन् विषये अपि बलं दत्तं यत् एतादृशः कोऽपि प्रस्तावः (यदि वर्तते) कस्मिन्नपि स्तरे विचारणीयः न भविष्यति। सर्वकारेण सर्वे विभागाः उक्ताः यत् ते एतेषां निर्देशाणां कठोरतया अनुपालनं सुनिश्चितं कुर्वन्तु। एषः आदेशः 'अत्यन्त-आवश्यक' (Most Urgent) श्रेण्यां निर्गतः अस्ति। तथापि, ये अधिकारिणः कर्मचारिणः च वर्तमाने सेवाविस्तारस्य, पुनर्नियुक्तेः वा पुनःसेवासंग्रहणस्य स्थितौ सन्ति, ते स्वकार्यकालस्य समाप्तौ सत्यां सेवानिवृत्ताः इति माननीयाः भविष्यन्ति।

# मुंबई-नगरे श्रीमन्नारायणीयपारायण-प्रतियोगिता तथा प्रश्नोत्तरी सफलतया सम्पन्ना





मुंबई-नगरे श्रीगुरुवायूरप्पन्- एकादशी श्रीमन्नारायणीयपारायण-प्रतियोगिता तथा नारायणीय-प्रश्नोत्तरी च केरलिय-क्षेत्र-परिपालन-केन्द्र-समित्या (KKKS) महाराष्ट्रप्रदेशे ऐतिहासिके मिनि-शबरीमला अय्यप्पमन्दिरे सफलतया आयोजिता।अस्मिन् पूर्णदिनस्य-आयोजिते आध्यात्मिके कार्यक्रमे १३००-अधिकाः भक्ताः समागताः। ४१-दलेभ्यः ३६०-अधिकाः प्रतियोगिनः महाराष्ट्रस्य विविधेषु प्रदेशेषु—पुणे-नगरात् बोइसर-नगरपर्यन्तं तथा मुंबई-नगरात्—आगत्य सहभागीभूताः। अयं कार्यक्रमः सामूहिक-पारायणेन तथा ज्ञान-विनिमयेन भक्तेः, अनुशासनस्य, सांस्कृतिक-एकतायाः च उत्कृष्टं दर्शनम् अकरोत्।

कार्यक्रमः शतवर्ष-प्राचीनस्य केरलात् बहिः स्थितस्य अय्यप्पमन्दिरस्य—मिनि-शबरीमला इत्यस्मिन् पवित्रे परिसरे आयोजितः। इदं मन्दिरं १०८ पवित्र-सोपानैः सह वनसदृश-शान्त-परिवेशे स्थितमस्ति।

## पारायण-प्रतियोगितायाः विजेतारः

**प्रथमं स्थानम् – स्वस्तिचिन्मयम्, पनवेल्**
**द्वितीयं स्थानम् – न्यू-बॉम्बे अय्यप्प-मिशन, वाशी**
**तृतीयं स्थानम् – गोकुलम्, डोंबिवली (खम्बालपाडा)**

## नारायणीय-प्रश्नोत्तरी-विजेतारः

**प्रथमं स्थानम् – इन्दिरा जी. पिल्लै (पवई)**
**द्वितीयं स्थानम् – शरण्या कृष्णकुमार**
**तृतीयं स्थानम् – शान्ति मुरलीधरन्**

आयोजकैः उक्तम्—
"सर्वे विजेतारः भगवतः समीपे" इति।

उपस्थिता विशिष्टा अतिथिः
केरलप्रान्तात् आगता आध्यात्मिक-प्रवक्त्री प्रो. सरिता अय्यर् मुख्य-अतिथिरूपेण उपस्थितवती। मुंबई-नगरस्य आयकर-विभागस्य आयुक्ता स्मिता वी. नायर 'अतिथिमान्या' इति रूपेण आगता।

KKKS-अध्यक्षः डॉ. ए. एस्. प्रसादः "सहस्रमुखेषु संस्कृतम्" इति योजनायाः कार्यकर्ता च, संस्कृतस्य संस्कृतेः च अभिन्न-सम्बन्धं विवृण्न् उक्तवान् यत् श्रीमन्नारायणीयस्य अध्ययनं शब्द-समृद्धिं व्याकरण-बोधं च वर्धयति, संस्कृत-प्रचारे च महत्त्वपूर्णं योगदानं करोति।अन्येऽपि वक्तारः—सुनील् जी. नायर् (महासचिवः), वल्सेशकुमारनायर् (कोषाध्यक्षः), PMP नायर् (अध्यक्षः, मिनि-शबरीमला), सुरेशकुमार् आर्. एन्. (उपाध्यक्षः)—स्व-वक्तव्यैः सभां सम्बोधितवन्तः।

रघुनाथः कुरुपः (आचार्यः) कार्यक्रमं संयोजितवान्, विनोथ् टी. च सूत्रधाररूपेण आसीत्। अन्ये मान्यवराः अपि उपस्थिताः आसन् तथा विविध-मन्दिर-समितीनां प्रतिनिधयः गुरुस्वामिनः च सत्कृताः।उपक्रमस्य विवरणम्२०१४-वर्षात् आरभ्य KKKS-संस्था एतां प्रतियोगितां प्रतिवर्षं आयोजयति। अस्याः अतिरिक्तं बालकानां कृते नारायणीय-प्रतियोगिताः, रामायण-पारायण-कार्यक्रमाः, प्रश्नोत्तर्यः च नियमितरूपेण क्रियन्ते, येन नवपीढ्याम् आध्यात्मिक-चेतना तथा सांस्कृतिक-ज्ञानं वर्धते।





# परिवर्तनाय असमः सज्जः, कांग्रेस-सर्वकारः भविष्यति—मुख्यमंत्रीः सुखविन्द्रसिंहसुक्खू

हिमसंस्कृतवार्ताः शिमला ।मुख्यमंत्री सुखविन्द्रसिंहसुक्खू सोमवासरे असमे अनेकेषु स्थानेषु कांग्रेस-पक्षस्य कृते प्रचारं कृतवान्। तेन असमस्य जलेश्वर तथा सेंगा विधानसभासनयोः कांग्रेस-प्रत्याशिनोः कृते मतानि याचितानि तथा कांग्रेस-पक्षस्य विजयाय अभियाचना कृता। सः अवदत् यत् राज्यस्य जनाः अस्मिन् समये परिवर्तनं इच्छन्ति तथा गतदशवर्षेषु भाजपा-सर्वकारस्य जनविरोधी-नीतिभ्यः पीडिताः अभवन्।मुख्यमंत्री सुक्खू अवदत् यत् भाजपा-शासनकाले भ्रष्टाचारः चरमसीमायाम् आसीत् तथा असमस्य संपदा लुण्ठिता। तेन आश्वासनं दत्तं यत् कांग्रेस-सर्वकारे स्थापितायां सर्वेषां भ्रष्टाचार-मामलानां जांचा कारयिष्यते तथा दोषिभ्यः विरुद्धं कठोराचारणं भविष्यति। सः उक्तवान् यत् भाजपा-शासने असमः विकासस्य स्पर्धायां पश्चात् गतः तथा राज्यस्य अर्थव्यवस्थायाम् अपि नकारात्मक-प्रभावः जातः।मुख्यमंत्री गायकस्य जुबीन गर्ग इत्यस्य संदिग्ध-मृत्योः विषयम् उत्थाप्य अवदत् यत् अस्मिन् विषये अद्यावधि कृतं कठोराचारणं असमस्य जनान् सन्तोषं न ददाति। सः उक्तवान् यत् कांग्रेस-सर्वकारे स्थापितायां शतदिनेषु अन्तर्गतं अस्मिन् विषये न्यायः सुनिश्चितः भविष्यति। सः कांग्रेस-पक्षं देशहिताय कार्यं कुर्वन्तं पक्षम् उक्तवान् तथा भाजपा धर्म-जाति-आधारेण राजनीति करोति इति आरोपितवान्। मुख्यमंत्री कांग्रेस-पक्षस्य घोषणापत्रस्य उल्लेखं कृत्वा उक्तवान् यत् कांग्रेस-सर्वकारे स्थापितायां असमे स्वव्यवसायं आरभमाणायाः प्रत्येकायै महिलायै ५०,००० रुप्यकाणां प्रारम्भिक-सहायता प्रदास्यते।वृद्धेभ्यः प्रतिमासं १,२५० रुप्यकाणां पेंशनं प्रदास्यते, यस्य कृते पृथक् विभागः स्थापितः भविष्यति। तेन अपि उक्तं यत् प्रत्येकं परिवारं उपचाराय २५ लक्ष-रुप्यकाणां पर्यन्तं कैशलेस-स्वास्थ्य-सुविधां प्राप्स्यति। सः उक्तवान् यत् कांग्रेस-पक्षः असमस्य जनान् प्रति कृतान् सर्वान् वादान् पूरयिष्यति।

# अथर्व-कालोन्यां आधुनिक-मार्ग-दीप-व्यवस्था सम्पन्ना;



## महापौरस्य निरीक्षणेन नागरिकेषु सन्तोषः

**जळगाव :(अर्जुन शास्त्री )** जलगाव नगरस्य अथर्व-कालोन्यां मुख्य-मार्गे (100-फुट्टी-रोडतः चित्ते-दादा-गृहपर्यन्तम्) नूतन-विद्युत्-स्तम्भानां तथा अत्याधुनिक-मार्ग-दीपानां स्थापना-कार्यं अद्यतनं सफलतया सम्पन्नम्। क्षेत्रीय-नागरिकानां पुनःपुनः निवेदनानन्तरं महानगरपालिकया एतत् कार्यं प्राधान्येन स्वीकृतम्। पूर्वं अस्मिन् मार्गे अपर्याप्त-प्रकाशस्य कारणेन रात्रौ गमनागमनं कठिनम् आसीत्। विशेषतः महिलानां तथा वृद्धानां सुरक्षाविषये चिन्ता वर्धिता आसीत्। वाहनचालकानामपि अन्धकारेण बाधाः अनुभूताः। अस्याः स्थितेः समाधानार्थं नूतन-स्तम्भाः स्थापिताः, उच्च-क्षमतेन युक्ताः एलईडी-दीपाः च संयोजिताः, येन सम्पूर्णः मार्गः अधुना प्रकाशमयः अभवत्। कार्यसमाप्तेः अनन्तरं महापौर-महोदयः सायंकाले अथर्व-कालोनीम् आगत्य प्रत्यक्ष-निरीक्षणं कृतवान्। तेन सम्पूर्णं मार्गं परिभ्रम्य दीप-व्यवस्था, स्तम्भ-निर्माणं, वायरिंग् तथा प्रकाश-तीव्रता सूक्ष्मतया परीक्षिता। सम्बन्धित-अधिकारिभ्यः आवश्यक-निर्देशाः दत्त्वा नियमित-पर्यवेक्षणस्य आदेशः अपि दत्तः।

अस्मिन् निरीक्षण-दौरे आमदारस्य पत्नी तथा कालोन्याः पूर्व-नगरसेविका श्रीमती सीमा भोळे अपि उपस्थिताः आसन्। ताभ्यां अपि अस्य कार्यस्य प्रशंसा कृताः, प्रशासनस्य शीघ्र-कार्यान्वयनस्य अभिनन्दनं च कृतम्।

अस्मिन् अवसरि बहवः नागरिकाः अपि उपस्थिताः आसन्। तैः महापौर-महोदयस्य तथा अन्येषां मान्यवराणां स्वागतं कृत्वा सन्तोषः व्यक्तः। अनेकैः नागरिकैः अनुभवान् कथयित्वा उक्तं यत्—"अधुना रात्रौ मार्गः पूर्णतया प्रकाशितः अस्ति, सुरक्षा-भावना च वर्धिता अस्ति।" नागरिकैः अवसरं लब्ध्वा मार्गस्य पुरुद्धारः, स्वच्छता, जलापूर्तिः तथा अन्येषां मूलभूतसौविध्यानां विषये अपि निवेदनानि प्रस्तुतानि। अस्मिन् विषये महापौरः सकारात्मक-भावेन शीघ्रं समाधानं करिष्यति इति आश्वासनं दत्तवान्। समग्रतया, अथर्व-कालोन्यां एषा प्रकाश-व्यवस्था नागरिकानां कृते अत्यन्तं लाभदायिनी अभवत्। सुरक्षा-सुविधयोः वृद्धिं करणीयं एतत् उपक्रमं सर्वैः

# श्रीसीतारामवैदिकादर्शसंस्कृत-महाविद्यालये एकदिवसीया राष्ट्रिया संगोष्ठी



**हिमसंस्कृतवार्ता डॉ.निशिकान्तपाण्डेयः।** बङ्गप्रदेशस्य कलिकाता स्थिते डानलपस्थाने श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालये आरम्भः जातः एकदिवसीया राष्ट्रिया संगोष्ठी। अस्य अनुष्ठानस्य सूचनाभवत् मङ्गलाचरणेन । तत्परं स्वागतभाषणं दत्तवान् महाविद्यालयस्य प्राचार्यः सोमेशकुमारमिश्रः। आशीर्वचनं प्रदत्तवान् प्रो.एस.सुब्रमन्यु । अस्य कार्यक्रमस्य मूलविषय आसीत् "भारतीयज्ञानपलम्परायां ध्यानस्य विजानं विधिश्च ।" वक्तारूपेण आसीत् सार्जारविभास्य चिकित्सकः ड.राणाएनरजनीश । सः देहलीस्थितः राममनोहरलईया चिकित्सालयस्य चिकित्सकः । कार्यक्रमे अस्मिन् विशेषरूपेण आसीत् डॉ. आन्द्रीया लोयारिशः, सा कलकाता विश्वविद्यालयस्य बौद्धविभागस्य अध्यापिका। अन्तर्जालीयमाध्यमेन आसीत् केन्द्रीयसंस्कृतविश्वविद्यालयस्य बौद्धदर्शनविभागस्य भूतपूर्वाध्यापकः प्रो. अवधेशकुमारचौवे । अत्र वर्णितचर्चायामासीत् MBBS तनुं श्री भट्टाचार्यः । अस्यां संगोष्ठां भागं गृहितवन्तः शोधच्छात्राः छात्राः च । अत्र प्रायः ६० जनाः आसन् ।

# अमरीकी-राष्ट्रपति-डोनाल्ड-ट्रम्पस्य ईरान-देशं प्रति भर्त्सना; होर्मुज-जलसन्धिं न उद्घाटयति चेत् विद्युत्-संयन्त्राणां सेतूनां च विनाशस्य संचेतना



**हिमसंस्कृतवार्ता।** अमरीका-देशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्पः संचेतनां दत्तवान् यत् यदि ईरान-देशः महत्त्वपूर्णस्य होर्मुज-जलडमरूमध्यस्य (जलसन्धेः) पुनः उद्घाटनेन सह सम्बद्धस्य तस्य नूतन-समयसीमा-निर्धारणस्य पालनं न करोति, तर्हि ईरानस्य विद्युत्-संयन्त्राणि सेतवः च विनाशिताः भविष्यन्ति। एषा चेतावनी तदा आगता यदा ईराने वैमानिक-आक्रमणेषु द्वौ सेतू एकं रेलस्थानकं च लक्ष्यीकृतम्। ईरानस्य अधिकारिणः युवकान् विद्युत्-संयन्त्राणां रक्षणाय मानव-शृङ्खलां निर्मातुं आह्वापितवन्तः। ट्रम्पः इदमपि भर्त्सितवान् यत् यदि ईरानः शान्तिकाले विश्वस्य २० प्रतिशतं तैल-परिवहन-मार्गस्य जलसन्धेः यातायातं पूर्णतया पुनः प्रवर्तयितुं अनुमतिं न ददाति, तर्हि अद्य रात्रौ एव 'सम्पूर्ण-सभ्यतायाः अन्तः' भविष्यति।अपरपक्षे, ईरानस्य राष्ट्रपतिः मसूद पेज़ेश्कियनः अवदत् यत् तेन सह १४ मिलियन (एककोटि-चत्वारिंशत्-लक्षं) जनाः स्वेच्छया युद्धार्थं स्वसेवाः अर्पितवन्तः। इस्रायलेन ईरानस्य अर्थव्यवस्थां आहतुं आक्रमणानि आरब्धानि। पश्चिम-ईरानस्य लोरेस्तान-प्रान्ते स्थितं 'खोरमाबाद' अन्तर्राष्ट्रीय-विमानस्थानकम् अपि अद्य अमरीका-इस्रायल-देशयोः वैमानिक-आक्रमणेन क्षतविक्षतं जातम्। अस्मिन् अन्तरे, ईरानेन इस्रायल-सऊदी अरब-देशयोः उपरि गोलिकाप्रहारः कृतः। अस्मात् कारणात् एकः प्रमुखः सेतुः अस्थायीरूपेण पिहितः जातः। राजनयिक-प्रयासेषु संलग्नाः अधिकारिणः उक्तवन्तः यत् वार्ता प्रवर्तते, किन्तु ईरानेन अमरीकायाः नूतनः प्रस्तावः तिरस्कृतः। अमरीकायाः उप-राष्ट्रपतिः जे.डी. वेन्सः उक्तवान् यत् ईरानेन सह वार्ता प्रचलति, किन्तु इदानीं 'कन्दुकः ईरानस्य क्रीडाङ्गणे' (निर्णयभारः ईराने) अस्ति। हंगरी-देशस्य बुडापेस्ट-नगरे पत्रकार-सम्मेलने श्रीवेन्सः अवदत् यत् पश्चिम-एशिया-सङ्घर्षे अमरीका स्वसैन्य-लक्ष्याणि प्रायशः प्राप्तवत् अस्ति।

## थोरियम-युगं प्रति भारतस्य महत् पदक्षेपः; कल्पक्कमे 'फास्ट ब्रीडर' परमाणु-संयन्त्र-तन्त्रज्ञानस्य उद्घोषणा



हिमसंस्कृतवार्ता। ईरान-युद्धकारणात् सम्पूर्णे विश्वे अस्वस्थता वर्तते। अपक्व-तैलस्य (कच्चे तेल के) मूल्यवृद्ध्या सर्वत्र मूल्यवृद्धिः (महँगाई) वर्धते। अमरीका-देशात् आरभ्य नेपाल-देशं यावत् प्रत्येकस्य देशस्य जनता पीडिता अस्ति। भारतमपि अस्य युद्धस्य प्रभावात् मुक्तं नास्ति, किन्तु अस्मिन् समये भारतस्य हस्ते 'अलादीनस्य दीपः' (अत्यन्तं मूल्यवान् पदार्थः) प्राप्तः। स्वयं प्रधानमन्त्री नरेन्द्रमोदी अस्य उद्घोषणां कृतवान्। यदि सर्वं सम्यक् भविष्यति, तर्हि अस्य 'अलादीन-दीपस्य' बलेन भविष्ये भारतं देदीप्यमानः नक्षत्रः इव भविष्यति। भारतं प्रति अरब-देशान् अथवा रूस-देशं प्रति तैल-निर्भरता न भविष्यति। वस्तुतः वयं 'फास्ट ब्रीडर न्यूक्लियर रिएक्टर' (द्रुत-प्रजनक-परमाणु-संयन्त्र) विषये चर्चां कुर्मः। कल्पक्कमे भारतेन एतस्य तन्त्रज्ञानस्य प्राप्तये आधिकारिक-उद्घोषणा कृता। 'फास्ट ब्रीडर' परमाणु-संयन्त्रम् एका अतीव जटिला प्रविधिः अस्ति। पाश्चात्यदेशाः एतां प्रविधिं प्राप्तुं असफलाः अभवन्। अस्याः प्रविधेः परमाणु-संयन्त्रेषु यूरेनियम-स्थाने 'थोरियम' इति पदार्थस्य उपयोगः क्रियते, विश्वस्य थोरियम-भण्डारस्य २५ प्रतिशतं भागः भारते एव अस्ति। अर्थात् अस्याः प्रविधेः साहाय्येन परमाणु-विद्युत्-क्षेत्रे भारतस्य यूरेनियम-निर्भरता समाप्ता भविष्यति। भारते यूरेनियम-भण्डारः अतीव न्यूनः अस्ति। एतदर्थं भारतं रूस-ऑस्ट्रेलिया-देशयोः उपरि निर्भरं भवति।

**सप्ततिवर्षेभ्यः पूर्वं आरम्भः**

भारतेन 'फास्ट ब्रीडर' परमाणु-संयन्त्रस्य कल्पना सप्ततिवर्षेभ्यः पूर्वं कृता आसीत्। प्रसिद्धेन वैज्ञानिकेन होमी जहाङ्गीर भाभा महोदयेन अस्यां दिशि कार्यं प्रारब्धम्। ततः आरभ्य भारतं एतां प्रविधिं प्राप्तुं प्रयत्नशीलम् आसीत्। वस्तुतः विश्वस्य षट् धनिकतमाः देशाः एतां प्रविधिं प्राप्तुं ५० बिलियन डॉलर (प्रायः ४.२५ लक्षकोटि रूप्यकाणि) व्ययं कृतवन्तः सन्ति।

## संस्कृतं मधुरं सदा -२३

अस्मिन् धरातले समुत्पन्नाः सर्वेऽपि प्राणिनः आत्मनि सुखं हि इच्छन्ति, न वा केऽपि दुःखसहनम् इच्छन्ति । यदि सम्यग्विचार्यते तर्हि दृश्यते यत् जगति तिलमात्रमपि वास्तविकं सुखं नास्ति, केवलं सुखस्य आभासो हि भवति । तथापि मन्यमानेषु विविधसांसारिकेषु सुखेषु आरोग्यसुखं हि मुख्यतमम् । परं विविधरोगकारणतः तत्सुखमपि दुर्लभमेव । दुःखस्य मूलन्तु शारीरिकरोगः एव, यः स्वकर्मफलानुसारं मनुष्येण लभ्यते । रोगः दुःखदायकः व्याधिः कथ्यते । रोगः इत्युक्ते शरीरवाङ्मनसां काचित् अस्वाभाविकी स्थितिः। दैनन्दिके जीवने मनुष्यस्य खाद्यकर्मनियमादीनां त्रुटिकारणतः शरीरे रोगोत्पत्तिर्भवति । पूर्वजन्मनः कर्मानुसारमपि फलरूपेण रोगारोग्यादिकम् अस्मिन् जन्मनि लभ्यते इत्यपि सत्यमेव । तथापि रोगेभ्यो मुक्तिं लब्धुम् अस्मिन् जन्मनि कश्चनः उपायस्तु करणीयो भवत्येव ननु ? अद्यत्वे प्रायशो रोगिणः 'ऐलोपैथिक'-औषधम् आश्रिताः सन्तः चिकित्सकानां वशतां गताः सन्ति । परन्तु ते तस्मादुपायात् सार्थकाः अपि न दृश्यन्ते । अधिकौषधसेवनेन अपि शरीरे पार्श्वक्रियाकारणतः नूतनरोगस्य उत्पत्तिर्जायते । तस्य निरामयस्य कृते पुनः अन्यः औषधानां सेवनम् इत्येवं प्रकारेण औषधसेवनशृङ्खला न कदापि समाप्ततां गच्छेत् । अन्ते मृत्युगर्ते स्वशरीरं हि पातनीयं भवेत् । अनेन उपायेन केवलं चिकित्सकानां कोषपूरणं हि सम्भवेत्, अन्यः न कोऽपि स्वलाभः हस्तगतः स्यात् । एवं प्रकारेण औषधाकर्षकाः चिकित्सकानां वशतां गताः बहवः रोगिणः इहलीलां समापयन्तः दरीदृश्यन्ते । औषधं केवलं तात्कालिकं रोगकष्टं हि शमयति, रोगस्य निर्मूलीकरणस्य सामर्थ्यं तस्मिन् न विद्यते । केवलं किञ्चित्कालाय कष्टनिवारणं हि तेन सम्भवति ।

अद्यत्वे जनेषु धैर्यमपि न्यूनमेव । तेषु अहमहमिकतया अग्रेसरणस्य दृष्टिः हि केवलम् । तेषां समयः सदैव न्यूनः ।

परन्तु प्राकृतिकरीत्या धैर्येण च मनुष्यः रोगात् पूर्णतः मुक्तिं लब्धुमर्हेत् । प्रथमतः तस्य दिनचर्या सम्यग् भवेत् । दिनचर्यानुसारं सात्त्विकताम् अवलम्ब्य, नियमितरूपेण आहारः, विहारः, निद्रा, जागरणं, कर्मचेष्टा इत्यादिकं समाचरेत् । अधिकचिन्तां त्यजेत् । आस्थावान्, विनययुक्तः, परहितचिन्तकः च भवेत् । वृथासक्तिं परित्यज्य मनसि सर्वदा प्रसन्नतां निदध्यात् । नियमितरूपेण भगवतः ध्यानधारणादिकं कुर्यात् । यतोहि मनुष्यजीवनस्य मूलाधारः हि परेश्वरोऽस्ति । प्रतिदिनं प्रातः सायञ्च वायुविहारार्थं गृहतः निर्गम्य शुद्धस्थानेषु नियततया, एकाकितया च व्रजेत् । भ्रमणकाले एकाकी सन् प्रसन्नमनसा भगवन्नाम, विशेषतः ओंकारस्य प्रतिपादं स्मरणं कुर्यात् । यदि प्रतिदिनम् एवं शुद्धसङ्कल्पं, विश्वासं च मनसि निधाय कश्चन मनुष्यः एतादृश्याः दिनचर्यायाः सधैर्यं पालनं कुर्यात् तर्हि सः अचिरेण हि स्वस्थ्यजीवनं प्राप्य अस्मिन् एव जीवने स्वर्गीयं सुखमनुभवेत् इत्यत्र न कापि शङ्का इति शुभम् ।



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या** - नमस्ते नन्दिनि। अद्य प्रथमा वार्ता अतीव भावपूर्णा अस्ति। केनचित् अपरिचितेन जनेन एकस्मै पित्रे धैर्यं दत्तम्। तस्य पुत्री रुग्णा आसीत्, तस्मिन् समये अपरिचितेन तस्य साहाय्यं कृतम्।

**नन्दिनी** - सत्यम्। परोपकारः एव परमः धर्मः। अन्या वार्ता अपि रुचिपूर्णा अस्ति। एकया भारतीय-महिलया श्रीलङ्का-देशस्य स्वच्छ-समुद्रतटानां प्रशंसा कृता। अन्तर्जाले बहुभिः जनैः एतत् दृश्य-मुद्रणं दृष्टम्।

**काव्या** - आम्, अस्माभिः अपि सर्वदा स्वच्छता पालनीया। चीनदेशस्य वुहान-नगरे निवसता एकेन भारतीयेन स्वस्य गृहं दर्शितम्। तत्र भाटक-मूल्यं बेङ्गलूरु-नगरात् न्यूनम् अस्ति इति तेन उक्तम्। अनेन जनेषु महान् विवादः आरब्धः।

**नन्दिनी** - आश्चर्यम्! मूल्य-वृद्ध्या जनाः क्लेशम् अनुभूतवन्तः सन्ति। अन्तिमा वार्ता तु अतीव विस्मयकरी। आफ्रिका-खण्डे एकया संस्थया कर्मकरेभ्यः अपहरण-अभिरक्षा-रूपेण अर्धं वेतनं घोषितम्। सर्वैः एतत् पठित्वा आश्चर्यं प्रकटितम्।

**काव्या** - सत्यम् एव। एताः सर्वाः वार्ताः अतीव विचित्राः। धन्यवादः नन्दिनि।

**नन्दिनी** - स्वागतं काव्ये। सर्वेभ्यः पुनर्दर्शनाय।



## भोजनपात्रस्य कथा

**संता-:** भो बंता! शीघ्रं वद... तादृशी का वस्तु अस्ति यां वयं खादितुं क्रीणीमः, परं न खादामः?

**बंता-:** (बहुक्षणं विचिन्त्य) भ्रातः, तत् 'आम्रफलम्' भवेत्, पक्वानन्तरं खादामः।

**संता-:** अरे मूर्ख! सा तु 'भोजन-स्थालिका' (Plate) अस्ति!